# SAN202

# (BAUDDHA DARSHAN)

## बौद्धदर्शने चतुरार्यसत्यानां विवेचनम्

बौद्धदर्शनस्य प्रवर्तकः भगवान् बुद्धो मन्यते, अस्य दर्शनस्य चतुरार्यसत्यानीति मूलभूतं तत्त्वमिति स्वीक्रियते। चतुरार्यसत्येषु दुःखमस्ति, दुःखसमुदयो वर्तते, दुःखनिरोधो वर्तते, दुःखनिरोधस्य च मार्गाः सन्ति। इमानि चत्वारि बुद्धोपदिष्टानि आर्यसत्यानि सन्ति, तत्र प्रथमसत्यानुसारं संसारः दुःखमय इति लौकिकोऽनुभवेन सिद्ध्यति। इह जगति स्थिताः सर्वेऽपि पदार्थाः अनित्याः नश्वराः एवम्भूतत्वात् दुःखरूपाः सन्ति। यल्लौकिकसुखं वर्तते तद् वस्तुतः दुःखयुक्तमेव। इदं सुखं समुपलब्धुं दुःखमेव जायते, सुखे प्राप्ते विनष्टत्वात् तत्र दुःखं समुपलभ्यते। संसारस्थाः काम-क्रोध-लोभ-मद-मात्सर्य-शोक-रोग(मानस-आधिः शारीरिकव्याधिश्च) जन्म-जरा-मृत्यवः सर्वेऽपि दुःखयुक्ताः तत्र अप्रियेण संयोगः प्रियाद् वियोग इति दुःखमेव वर्तते। इदमाध्यात्मिकं दुःखमेव वर्तते। पञ्चस्कन्धस्वरूपाणि रूप-वेदना-संस्कार-विज्ञानानि दुःखयुक्तानि, सारांशेन प्रोच्यते चेद् जन्मतः मृत्युपर्यन्तं सर्वमपि दुःखमेव। मृत्युरपि दुःखस्यान्तः न, यतः मृत्योरनन्तरं पुनर्जन्म वर्तते जन्मन अनन्तरं मृत्युरस्ति एवम् इदं जनम-मृत्यु-चक्रमथवा भवचक्रं जगतो नियमः वर्तते।

द्वितीयं सत्यं दुःखसमुदयो वर्तते। अस्यार्थः दुःखमुत्पद्यते अस्योदयः समुदयो वा भवति, यदुत्पद्यते तत्कार्यमुच्यते तथा प्रत्येकस्य कार्यस्य किमपि कारणम् अवश्यमेव भवति। कारणं विना न किमपि कार्यं भवितुमर्हति, कारणं सर्वदैव कार्यसापेक्षं भवति। कारणे सति कार्यं भवति अयं नियमः सांख्यदर्शनस्य तथा बौद्धदर्शनेनापि प्रतीत्यसमुत्पादः इति नाम्ना स्वीक्रियते, अस्मिन् सति इदं भवति, अस्मिन् असति इदं न भवति। कार्योत्पत्तये हेतुप्रत्यययोः आवश्यकता भवति कार्यकारणस्य बृहद् श्रृङ्खला वर्तते या द्वादशाङ्गचक्ररूपेण परिभ्रमते, अयमेव प्रतीत्यसमुत्पादः दुःखसमुदयस्य कारणं तथा अविद्या अस्य जननी वर्तते। अविद्याजन्यतृष्णाकारणात् इह जगति आसक्तिर्जायते तथा भवचक्रं प्रचलति।

तृतीयम् आर्यसत्यम्- दुःखनिरोधः कारणे सत्येव कार्यमुत्पद्यते, अतः कारणे असति कार्यमपि न विद्यते तथा पुनः उत्पद्यते। दुःखं कार्यमस्ति, अतः तस्मिन् कारणे विनष्टे दुःखनिरोधो सम्भवति। अविद्यानाशेन तेन द्वादशाङ्गप्रतीत्यसमुत्पादमचक्रमपि न प्रचलति। अयमेव दुःखनिरोधो विद्यते। तृष्णायाः सर्वथा क्षयेण अनासक्तिरूपा निर्विकल्पावस्था वर्तते, अविद्या-निवृत्या अपरोक्षानुभूत्या दुःखस्यान्तिकनिरोधो जायते। इदमेव निर्वाणं प्रोच्यते इदमेव च अमृतपदं मन्यते।

चतुर्थम् आर्यसत्यम्- दुःखनिरोधगामिनी प्रतिपद् अर्थात् दुःखनिरोधस्य मार्गः प्रोच्यते। अयं नैतिकाध्यात्मिकसाधनयोः मार्गः, यः आर्याष्टाङ्गिकमार्गः इति नाम्नाभिजायते। अयं चतर्थे आर्यसत्ये

समायाति। अस्य आर्यमार्गस्य आर्याष्टाङ्गानि सन्ति- १. सम्यग् दृष्टिः, २. सम्यक् सङ्कल्पः(अयम् आर्यमार्गेषु गमनाय दृढनिश्चयो वर्तते), ३. सम्यग् वाक्(इयं वाण्याः पवित्रता सत्यता च वर्तते) ४. सम्यक् कर्मान्तः(इदं हिंसा-द्वेष-दुराचरणस्य त्यागः सत्कर्मणां च आचरणं वर्तते), ५. सम्यक् आजीवः (इदं न्यायोचितं जीविकोपार्जनं वर्तते) ६. सम्यग् व्यायामः(अयं शुभोत्पत्तिरशुभस्य च निरोधस्य हेतोः सततं प्रयत्नः वर्तते), ७. सम्यक् स्मृतिः (इयं शारीरिक-मानसिक-भोग्यवस्तूनां काम-मोह-लोभादिभावानां अनित्यता-अशुचितयोः निरन्तरभावना एवं चित्तस्यैकाग्रता वर्तते) ८. सम्यक् समाधिः (इयं चित्तैकाग्रतया निर्विकल्पप्रज्ञाया अनुभूतिरस्ति। भगवता बुद्धेन इयं दुःखनिरोधगामिनी प्रतिपद् अष्टाङ्गिकमार्गः मध्यमाप्रतिपद् मध्यममार्गो वा संज्ञा प्रदीयते। अयं भोगविलासस्य शरीरक्षीणकारकस्य कठोरतपसः मार्गो वर्तते। भगवता बुद्धेन प्रोक्तमस्ति- भो भिक्षवः! प्रवज्यास्वीकर्तृभि द्वयोः अन्तयोः सेवनं न कर्तव्यम्, तर्हि बौद्धौ तौ द्वौ अन्तौ कौ? इति प्रश्ने भगवता बुद्धेन प्रोक्तम्। प्रथमन्तु कामसुखेषु आसक्तिः, या हीना वर्तते, ग्राम्या वर्तते पृथग्जनोचिता अनार्या अनर्थानां जडमस्ति द्वितीयया आत्मपीडायाम् आसक्तिः या दुःखमया अनार्या अनर्थानां च जडमस्ति। भो भिक्षवः इमौ द्वौ अन्तौ परित्यज्य तथागतेन मध्यममार्गः साक्षात्कृतः। (विनयपिटक, १.१.७)

एतस्मिन् क्रमे बौद्धानां त्रिरत्नानि शील-समाधि-प्रज्ञाः निर्वाणप्राप्तस्य मार्गाः स्वीक्रियन्ते। इमानि त्रीण्येव आर्याष्टाङ्गिकभागेषु समागच्छन्ति। शीलस्यार्थः – सत्कर्मसु प्रवृत्तिः असत्कर्मभ्यः विरागः। अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-मदिरापानादीनां नशायुक्तपदार्थानां त्यागः बौद्धानां पञ्चशीलं समागच्छन्ति। यानि भिक्षूणां गृहस्थानां च कृते विहितानि सन्ति, भिक्षूणां कृते अपराणां पञ्चशीलानां पञ्चशीलानां अयं विधानमस्ति। तानि असमयभोजनम्, मालाधारणम्, सङ्गीतनृत्यादीनां स्वर्णरजतादीनां सुखदशैयानां त्यागः।

समाधौ चतुर्विधानि ध्यानानि वर्ण्यन्ते, प्रथमं ध्यानं सवितर्कम्, सविचारम् विवेकेन उद्भूतं प्रीतिसुखयुक्तमस्ति। द्वितीयध्याने वितर्क-विचारयोः शान्तत्वात् मनःप्रसादात् चित्तैकाग्रताभिः युक्तं प्रीतिसुखं ध्यानं भवति।

तृतीयध्याने साधकः प्रीति-विरागयोरपि उपेक्षां विधाय स्मृतिमान् भूत्वा सुखविहारम् आप्नोति।

चतुर्थध्याने साधकः सुखं-दुःखं द्वे एव विहाय पूर्वमेव सौमनस्य-दौर्मनस्ययोः अस्तयोः दुःख-सुखाभ्यां रहितः सन् स्मृति-उपेक्षाभ्यां शुद्धो भूत्वा विहरति। प्रज्ञा श्रुतमयी अर्थात् बुद्धवाक्यजन्य-निश्चयः चिन्तामयी (बौद्धिकचिन्तनादुत्पन्नः निश्चयः) भावनामयी (समाधिजन्यज्ञानं) मन्यते। भावनामयी प्रज्ञा चतुर्थध्याने प्रकाश्यते। अनेन कामास्रव-भवास्रव-अविद्यास्रवाणां आत्यन्तिके विनष्टे साधको मुक्तो भवति। स जन्म-मरण-चक्राद् मुक्तो भवति।

आचार्यबलदेवोपाध्येन लिख्यते यत् कर्तव्यशास्त्रदृष्ट्या भगवता बुद्धेन चतुर्णां सत्यानाम् अन्वेषणं विहितम्, एतेषां सत्यानां सम्यग् ज्ञानेन अनेन भगवता बुद्धेन सम्बोधि प्राप्ता। इमानि सत्यान्येव आर्यसत्यानि निगदितानि अर्थात् तानि सत्यानि यानि अर्हत एव सम्यक् ज्ञातुं शक्नुवन्ति। सत्यानि तु

अनन्तानि किन्तु अत्यधिकमहत्त्वकारणात् इमानि सत्यानि सर्वश्रेष्ठानि मन्यन्ते। आचार्यचन्द्रकीर्तेः कथनानुसारम् एषां सत्यानां आर्य कथनस्य अभिप्रायः अयमेव यत् आर्यजनः विद्वज्जनः एव इमानि सत्यानि लब्धुं शक्यन्ते। सामान्यजनाः जीवन्ति मृयन्ते दुःखमयजगच्च प्रतिक्षणम् अनुभवन्ति, किन्तु ते एतानि सत्यानि अन्वेष्टुं कथमपि समर्था न भवन्ति। आर्यजना एव एभिः दुःखै आघाता भवन्ति, परन्तु सामान्यजनाः अहर्निशं तेष्वेव दुःखेषु जीवन्ति, परन्तु ते तद्रहस्यं विज्ञातुं न प्रभवन्ति।

इमानि चत्वारि आर्यसत्यानि सन्ति-

१. दुःखम्- अस्य जगतः जीवनं दुःखयुक्तम्।

२. समुदयः- अस्य दुःखस्य कारणं विद्यते।

३. दुःखनिरोधः – अस्माद् दुःखाद् वास्तविकमुक्तिः लभ्यते।

४. दुःखनिरोधगामिनी प्रतिपद्- दुःखनाशाय आर्याष्टाङ्गिकमार्गाः सन्ति। येषाम् अवलम्बनेन जगति विद्यमानस्य दुःखस्य विनाशो भवति। उच्यते यत् भगवता बुद्धेन इमानि सत्यानि अन्वेषितानि, परन्तु ऐतिहासिकदृष्ट्या एषां तथ्यानाम् उद्घाटने बहुपूर्वमेव भारतीयआध्यात्मिक-वेतृभिः विहितमासीत्। महर्षिव्यास-विज्ञानभिक्षोः कथनमस्ति यत् अध्यात्मशास्त्रं चिकित्साशास्त्रं चिकित्साशास्त्रसम चतुर्व्यूहः, यथा- चिकित्साशास्त्रे रोग-रोगहेतु-आरोग्य-भैषज्यानि सन्ति तथैव दर्शनशास्त्रे संसार-संसारहेतु-मोक्ष-मोक्षोपायाः विद्यन्ते। इमान्येव आर्यसत्यानि सन्ति. यथा-वैद्येन स्वीयौषधिः रोगनाशः क्रियते तथैव तत्त्वज्ञानीभिरपि दुःखोपायाः निगद्य तेभ्यो दुःखेभ्यो जनाः मोक्षिणः क्रियन्ते। अस्मादेव समताकारणात् भगवान् बुद्धो महान् भिषक् पदेन स्वीक्रियते। बौद्धसाहित्ये नैके सूत्रग्रन्थाः सन्ति, यत्र अनेनैव अभिप्रायेण सङ्केतः क्रियते। सर्वत्र एकसममेव आर्यसत्यानां विषये वर्णनं लभ्यते।

**१.** दुःखम्- संसारोऽयं दुःखयुक्तः, यावत् अस्माकं दृष्टिर्गच्छति तावद् दुःखमेव वर्तते। यत्र कुत्रचित् यदि सुखं दृश्यते चेत् तत्रापि अचिरकालं यावदेव भवति। अस् विरोधः कथमपि कर्तुं न शक्यते, दुःखस्य व्याख्यां कुर्वता भगवता बुद्धेन प्रोच्यते- **"इदं खो पुन भिक्खवे दुक्खं अरिय सच्चं। जाति पि दुक्खा, जरापि दुक्खा मरणम्पि दुक्खं, सोकपरिदेव-दोमनस्सुपायासापि दुक्खा, अप्पियेहि सम्पोयोगो दुक्खो पियेहि विप्पयोगो दुक्खो, यम्पिच्छं न लभति तम्पि दुक्खं, संख्यत्तेन पञ्चूपादानक्खन्धापि दुक्खा ।"**

अर्थात्- हे भिक्षुगण दुःखं प्रथमम् आर्यसत्यम्। जन्मापि दुःखम्, वृद्धावस्थापि दुःखा। मरणमपि दुःखम्। शोक-परिवेदना-दौर्मनस्य-उपायासाः सर्वाण्यपि दुःखानि सन्ति। अप्रियवस्तुना साकं समागमः दुःखम्, प्रियाद् वियोगोऽपि दुःखम्। इदं दुःखं सांख्यदर्शनानुसारं मानसिकम् आध्यात्मिकं दुःखं वर्तते। ईप्सितवस्तूनाम् अप्राप्तरपि दुःखम्, संक्षेपेण वक्तुं शक्यते यद् रागेण उत्पन्नाः पञ्चस्कन्धा अपि दुःखाः। अस्य तात्पर्यमिदं यद् जगतः यत्किमपि कार्यं या काऽपि घटना सञ्जायते तत्सर्वं वस्तुतः दुःखयुक्तमेव।

धनसम्पतीनां कृते मानवः सततं प्रयत्नरतो भवति तस्य प्राप्तौ दुःखम् प्राप्तेरनन्तरं संरक्षणे दुःखम् तथा व्ययेऽपि दुःखम्, तर्हि धनं कथं सुखकारकम्?

धम्मपदस्य एका गाथा अस्मै प्रसङ्गाय बहुसार्थका वर्तते-

**को नु हासो किमानन्दो निच्चं पज्जलिते सति।**
**अन्धकारेन ओनद्धो पदीपं न गवेसथ।।(धम्मपद गा-१४६)**

अर्थात्- अयं संसारः भव-ज्वालया प्रदीप्तभवन इव वर्तते, परन्तु मूढाः अज्ञानवशाद् विविधभोगविलासोपकरणम् एकत्रीकुर्वन्ति। भोगविलासाय अस्मिन् जगति यानि कान्यपि वस्तूनि विद्यन्ते तानि सुखापेक्षया दुःखमेवोत्पादयति। अतोऽअस्मिन् जगति प्रथमं सत्यं दुःखमेव प्रतीयते। सामान्यजना इदं प्रतिक्षणम् अनुभवन्ति, किन्तु ते सामान्यघटनामिति मत्वा ततः अग्रेसरन्ति। किन्तु भगवतो बुद्धस्य अनुभवो नितान्तं सत्यं वर्तते। महर्षिपतञ्जलिना सुस्पष्टं प्रोक्तम्- दुःखमेव सर्वं विवेकिनः(योगसूत्रम्२-१५) विवेकयुक्तपुरूषाणां कृते सकलमिदं जगत् दुःखमेव।

२. दुःखसमुदयः – द्वितीयम् आर्यसत्यं दुःखसमुदयोऽथवा दुःखस्य कारणं वर्तते। अतो द्वितीयं सत्यं दुःखस्य कारणं विद्यते। यतोहि कारणं विना कार्यं कदापि नोत्पद्यते। कार्यकारणस्य नियमोऽच्छेद्यो वर्तते। यदा दुःखं कार्यमस्ति चेत् अस्य कारणमपि अवश्यमेव स्यात्, अतः दुःखस्य कारणं तृष्णा वर्तते, भगवता बुद्धेनोच्यते- **“इदं खो पन भिक्खवे दुक्खसमुदयं अरियसच्चं। योयं तण्हा पोनब्भविका नन्दिरागसहगता तत्र तत्राभिनन्दिनी सेयमिदं कामतण्हा, भवतण्हा विभवतण्हा।”**

अर्थात्- हे भिक्षुगण दुःखसमुदयो द्वितीयम् आर्यसत्यं वर्तते। दुःखस्य वास्तविकहेतुः तृष्णा वर्तते, या मुहूर्मुहू भूतान् उत्पादयति। विषयाणां रागाद् युक्ता तथा तान् विषयान् अभिनन्दयति। यत्र-तत्र सर्वत्र स्वतृप्तिम् अन्विषति। इयं तृष्णा त्रिविधा वर्तते- कामतृष्णा, भवतृष्णा विभवतृष्णा च। संक्षेपेण प्रोच्यते चेद् दुःखसमुदयस्य इदमेव स्वरूपं वर्तते।

दुःखस्योत्पत्तेः कारणं तृष्णा अथवा पिपासा विषयाणां पिपासा। यदि विषयान् अधिगन्तुं पिपासा न स्यात् तर्हि अस्मिन् जगति अस्माकम् आगमनमेव न स्यात्। तृष्णा सर्वेषु बन्धनेषु श्रेष्ठा या अस्मान् भूतेभ्यः त्रायन्ते, ये धीराः भवन्ति ते लोहबन्धनम्, काष्ठबन्धनं तथा रज्जुबन्धनं दृढं न मन्वते।